श्रेष्ठा सप्तदशाहे सा मध्या षाण्मासिके तथा।
निकृष्टा वर्षमध्ये तु ततः ऊर्द्ध न कारयेत्॥
कार्तिकादि शुभे मासे उतरायणगे रवौ।
शुक्लपक्षेऽथवा कृष्णे द्वादशादि शुभे तिथौ॥
ब्राह्मणं च समाहूय विधिज्ञं शुभलक्षणम्।
मुनिप्रणीत विधिना धर्मशान्तिं च कारयेत्॥

धर्मशान्ति में वेदी निर्माण—



धर्म शान्ति

पवित्रधारणम् : **ॐ पवित्रेस्थो वैष्णव्यो सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्यरश्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्ययत्कामः पुनेतच्छकेयम्॥**

वैष्णवाचमनम् : **ॐ केशवाय नमः। ॐ नारायणाय नमः। ॐ माधवाय नमः।**

हस्त प्रक्षालनम् : **ॐ गोविन्दाय नमः। ॐ श्री कृष्णपरमात्मने नमः।**

प्राणायाम : **ॐ भूर्भुवः स्वः। तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्।**

दिग्वन्धनम् : **ॐ अपसर्पन्तु ते भृता ये भूता भुवि संस्थिताः। ये चात्र विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया॥**

उपक्रामन्तुभूतानि पिशाचा सर्वतो दिशम्।

सर्वेषामविरोधेन ब्रह्म कर्मसमारभे ॥

तत्पश्चात् पीली सरसों को पूर्वादि से क्रमशः चारों और फेंकें।

ॐ प्राच्यै नमः, ॐ अवाच्यै नमः, ॐ प्रतीच्यै नमः। ॐ उदीच्यै नमः, ॐ अन्तरिक्षायनमः, ॐ यज्ञभूम्यै नमः॥

विनियोग : **ॐ पृथिवीति मन्त्रस्य मेरूपृष्ठऋषिः सुतलं छन्दः कूर्मो देवता आसनशोधने विनियोगः॥**

पृथिवी पूजा : **ॐ पृथ्वी त्वया धृतालोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरुचासनम्॥**

ॐ पृथिव्यै (आधारशक्तये) पादयोः पाद्यं, हस्तयोः अर्घ्यं, मुखे आचमनीयम् शरीरे स्नानीयम् वस्त्रोपवस्त्रं, यज्ञोपवीतं एष गन्धः इमे अक्षताः इमानि पुष्पाणि धूपोदीपश्च नैवेद्यं दक्षिणा द्रव्यं समर्पयामि॥

नोट : इति सर्वेषां देवानां कृते सर्वत्र प्रयोज्यम्॥

तीर्थाभिमन्त्रणम् : ॐ गंगेच यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिंकुरु ॥

आत्मसिंचनम् : ॐ अपवित्रः पवित्रोवा सर्वावस्थांगतोऽपिवा।
यः स्मरेत्पुण्डरीकाक्षं स वाह्याभ्यन्तरः शुचिः पुण्डरीकाक्षः पुनातु।

आत्म तिलकम् : ॐ सुचक्षाऽअहमक्षीभ्यां भूयासꣳसुवर्चा मुखेन।
सुश्रुत कर्णाभ्यांभूयासम् ॥

अङ्गन्यास : ॐ मनो वाक् प्राण चक्षुः श्रोत्र नाभिहृदय कण्ठ शिरः शिखावाहूभ्यां यशोवलम् ॥

दीपार्घ्यम् : ॐ सुप्रकाश महादीप सर्वतस्तिमिरापह।
प्रसीदमम गोविन्द दीपार्घ्य प्रतिगृह्यताम् ॥

दीपप्रार्थना : ॐ भो दीप। ब्रह्मरूपस्त्वमन्धकार निवारक।
इमा मया कृता पूजा गृह्णतेजो विवर्धय।

धूप अर्घ्यम् : ॐ वनस्पति रसोद्भूतो गन्धाढयः सुमनोहर।
आघ्रेयः सर्वदेवानां धूक्क्कमार्घ्यः प्रतिगृह्यताम् ॥

प्रार्थना : वासना वासुदेवस्य वासितं भुवनत्रयम्।
सर्वभूत निवासोऽसि वासुदेव नमोस्तुते ॥

प्रतिज्ञा संकल्प

ॐ विष्णुर्विष्णुर्विष्णुः अद्य तत्सत् ब्रह्मणोह्निद्वितीये परार्धे विष्णुपदे श्रीश्वेतवाराह कल्पेवैवस्वतमन्वन्तरे अष्टाविंशतितमेयुगे कलियुगे कलिप्रथमचरणे भूर्लोके जम्बुद्वीपे भारतवर्ष भरतखण्डे आर्यावर्तैकदेशांन्तर्गते पुण्य बृहस्पति क्षेत्रे अमुकायनगते सूर्ये मासोत्तमेमासे अमुक मासे अमुक पक्षे अमुक तिथौ अमुक वासरे यथा योग करण मुहूर्त वर्तमाने चन्द्रतारानुकूले पुण्येऽहनि अमुक गोत्रोऽमुक शर्माऽहं काय वांङ् मनः सकलपापक्षय पूर्वक श्रुति स्मृति पुराणोक्त पुण्य फलप्राप्ति कामा अमुक गोत्रस्य अमुक शर्म्मणः पितुः यम मार्गे तीव्रवाताश्म वृष्टि शर्कराकंटक तप्तवालुका वैतरण्यादि दोषनिवृत्तिहेतुना धर्मशान्ति कर्मणि गणपतिपूजन पूर्वकमेभिर्द्रव्यैर्दश दिक्पाल षोडशमातृ चतुर्षष्टि योगिन्यष्ट कुल वासुकि पूजन पुरासर सूर्यादिनवग्रह यथोक्त वेदादिभिर्मन्त्रैः पूजनमहं करिष्ये ॥

॥ अथच स्वस्तिवाचनम् ॥

ॐ स्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्तिनः पूषाव्विश्ववेदाः स्वस्तिनस्तारक्षोऽरिष्टनेमिः स्वस्तिनो वृहस्पतिद्द्धधातु॥ पयः पृथिव्यां पयऽओषधीषु पयोदिव्यन्तरिक्षे पयोधाः। पयस्वतीः प्रदिशः सन्तुमह्यम्। विष्णोरराटमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि। वैष्णवमसि विष्णवेत्वा। अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रूद्रादेवता ऽऽदित्या देवता मरूतो देवता विश्वे देवा देवता वृहस्पतिर्देवतेंद्रो देवता वरुणो देवता। ॐ द्यौः शान्तिरन्तरिक्षᳪ शान्तिः पृथिवि शान्ति रापः शान्ति रोषधयः शान्तिः। वनस्पतयः शान्ति र्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वᳪ शान्तिः शान्तिरेव शान्तिः सामा शान्ति रेधिसुशान्तिर्भवतु। ॐ विश्वानिदेवसवितर्दुरितानि परासुव। यद्भद्रं तन्नऽआसुव। इमा रूद्राय तवसे कपर्दिनेक्षयद्वीराय प्रभरामहे मतीः यथाशमसद्द्विपदे चतुष्पदे विश्वंपुष्टङ्ग्रामेऽअस्मिन् ननातुरम्। एतन्तेदेवसवितुर्यज्ञम्प्राहु-र्बृहस्पतये ब्रह्मणे। तेन यज्ञमवतेन यज्ञपतिन्तेन मामव॥ मनोर्जूति र्ज्जुषतामाज्यस्य बृहस्पतिर्यज्ञ मिमं तनोत्वरिष्टं यज्ञᳪसमिमन्दधातु। विश्वेदेवासऽइह मादयन्तामोप्रतिष्ठ॥ एष वै प्रतिष्ठानाम यज्ञोयत्रैतेन यज्ञेन यजन्ते सर्वमेव प्रतिष्ठितम्भवति॥

॥ अथ गणपति पूजा मन्त्र ॥

ॐ गणानान्त्वा गणपतिᳪहवामहे प्रियाणान्त्वा प्रियापतिᳪहवामहे निधिनान्त्वा निधिपतिᳪहवामहे वसोमम आहम् जानिगर्भधमात्वमजासि गर्भधम्। नमो गणेव्भ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गृत्सेव्भ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्चवो नमः॥

गणपति प्रार्थना

ॐ सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः। लम्बोदरश्च विकटो विघ्ननाशो विनायकः॥ धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः। द्वादशैतानि नामानि यः पठेच्छृणुयादपि॥ विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा संग्रामे संकटे चैव विघ्नस्तस्य न जायते॥ शुक्लाम्वरधरं देवं शशिवर्णं चतुर्भुजम्। प्रसन्नवदनंध्यायेत्सर्व विघ्नोपशांन्तये। अभीप्सितार्थ सिद्धयर्थं पूजितो यः

सुरासुरैः ॥ सर्व विघ्न हरस्तस्मै श्री गणपतयेनमः। वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ। निर्विघ्नंकुरू मे देव सर्व कार्येषु सर्वदा।

॥ अथ लक्ष्मी पूजा मन्त्र ॥

ॐ श्रीश्चते लक्ष्मीश्च पत्न्या वहोरात्रे पार्श्वेनक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णान्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण ॥ श्री लक्ष्म्यै नमः ॥

नोट : पश्चात् हाथ जोड़कर प्रार्थना करें।

॥ लक्ष्मीप्रार्थना ॥

ॐ नमस्तेऽस्तु महामाये श्री पीठे सुर पूजिते।
शंख चक्र गदाहस्ते महालक्ष्मी नमोऽस्तुते ॥

नमस्ते गरूडारूढे कोलासुरभयंकरी। सर्व पाप हरे देवि महालक्ष्मी नमोऽस्तुते ॥ सर्वज्ञे सर्ववरदे सर्व दुष्ट भयंकरी। सर्व दुःख हरे देवी महालक्ष्मी नमोऽस्तुते ॥

सिद्धि बुद्धि प्रदे देवि भुक्ति मुक्ति प्रदायिनि। मन्त्र पूते सदा देवी महालक्ष्मी नमोऽस्तुते ॥

आद्यन्तरहिते देवि आद्य शक्ति महेश्वरी। योगजे योग सम्भूते महालक्ष्मी नमोऽस्तुते ॥

स्थूल सूक्ष्म महारौद्रे महा शक्ति महोदरे। महापाप हरे देवी महालक्ष्मी नमोऽस्तुते ॥

पद्मासन स्थिते देवि परब्रह्मस्वरूपिणि। परमेशि जगन्मातर्महालक्ष्मी नमोऽस्तुते ॥

श्वेताम्बर धरे देवी नानालंकार भूषिते। जगत् स्थिते जगन्मातर्महालक्ष्मी नमोऽस्तुते ॥

॥ अथ रक्षा पूजा मन्त्रः ॥

ॐ मानः शꣳसोऽररूषो धूर्तः प्रणमर्त्यस्य रक्षाणो ब्रह्मणंस्पते ॐ यदा वन्धनन्दाक्षायणाहिरण्यꣳ शतानी काय सुमनस्य मानाः। तन्म आवध्नामि शत शारदाया युष्मांजरदष्टिर्यथासम्।

नोट : इस मन्त्र से मौली पर फूल अक्षत जल तथा तिलक चढ़ा करके निम्नलिखित मन्त्र पढ़ करके दाएं हाथ में बांध दें।

ॐ येन बद्धो बलीराजा दानवेन्द्रो महावलः। तेन त्वां प्रतिवध्नामि रक्षे मा चल मा चल ॥

॥ ओंकार पूजनम् ॥

ॐ आवाहयाम्यहं देवं ॐ कारं परमेश्वरम्। त्रिमात्रं त्र्यक्षरं त्रिपदं च त्रिदैवतम् ॥

त्र्यक्षरं त्रिगुणाकारं सर्वाक्षरमयं शुभम्। अणवं प्रणवं हंसं स्रष्टारं परमेश्वरम् ॥

अनादि निधनं देवमप्रमेयं सनातनम्। परात्परतरं बीजं निर्मलं निष्कलं शुभम् ॥

ॐ आव्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्योति ब्याधीमहारथो जायताम् दोग्धीर्धेनुर्वोढा नडवानाशुः सप्तिः पुरन्धिर्योषा जिष्णुरथेष्ठाः। सभेयो युवास्य यजमानस्य वीरो जायताम् निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न औषधयः पच्यन्तांयोगक्षेमोनः कल्पताम्।

ॐ ओंकारं बिन्दु संयुक्तं नित्यं ध्यायन्ति योगिनः।
कामदं मोक्षदं चैव ओंकाराय नमोनमः ॥

॥ षोडशमातृका पूजनम् ॥

ॐ गौरी पद्मा शची मेधा सावित्री विजया जया। देव सेना स्वधा स्वाहा मातरो लोक मातरः ॥ धृतिः पुष्टिस्तथा तुष्टिस्तथात्मकुलदेवता। कुल देव्यन्तर्गत गौर्यादि षोडश मातृकाभ्यो नमः ॥

॥ अथसप्त घृत मातृका पूजनम् ॥

ॐ ललिता च उमा गौरी अम्बिका सलिलाश्च या ॥
भगाही च भगाक्षीच सप्तैते घृत मातराः ॐ सप्तघृतमातृकाभ्यो नमः ॥

॥ अथ ब्रह्म पूजनम् ॥

ॐ ब्रह्मयज्ञानं प्रथमं पुरस्ताद् विसीमतः। सुरुचोवेन आवः सुवुध्न्या उपमा अस्य विष्ठाः सतश्चयोनिमसतश्चविवः ॥

॥ ॐ ब्रह्मणे नमः ॥

॥ अथविष्णु पूजनम् ॥

ॐ इदं विष्णुर्विचक्रमेत्रेधा निदधेपदम्। समूढ़मस्य पाः सुरे स्वाहा॥ ॐ विष्णवे नमः॥

॥ अथ शिव पूजनम् ॥

ॐ नमः शंभवाय च मयोभवाय च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॐ शिवाय नमः॥

॥ अथ चतुषष्ठि (चौसठ) योगिनी पूजनम् ॥

ॐ आवाह्याम्यहं देवीं योगिनि परमेश्वरीम्॥ योगाभ्यासेन सन्तुष्टा परध्यान समन्विता॥ दिव्य कुण्डल संकाशा दिव्य ज्वाला त्रिलोचना। मूर्तिमति हय्मूर्ता च उग्राचैवोग्ररूपिणि॥ अनेक भाव संयुक्ता संसारार्णव तारिणि। यज्ञं कुर्वन्तु निर्विघ्नं श्रेयो यच्छन्तु मातरः॥ ॐ चतुषष्टि योगिनीभ्यो नमः॥

तत्पश्चात् चतुषष्टि योगिनी के लिए तेल संकल्प करें।

संकल्प : ॐ अद्येति संकीर्त्य अमुक गोत्रोऽहं अमुक नाम शर्माऽहं डाकिनी शकिनी तस्करादि दोष निवारणार्थ कर्तव्यं भैरव क्षेत्रपाल पूजन योगिनी पूजा कर्मणि यथा शक्ति तैल तत् प्रतिनिधि भूतमिदं द्रव्यं वा यथा नाम गोत्राय ब्राह्मणाय (योगिनीभ्यः) तुभ्यमहं सम्प्रददे।

कलश स्थापनम्

भूमिस्पर्श : ॐ महीद्यौः पृथ्वी च नऽइमं यज्ञं मिमिक्षितम्। पिपृतानो भरीमभिः।

तण्डुलपुंजम् : ॐ ओषधयः समवदन्त सोमेन सह राज्ञा।
यस्मै कृणोति ब्रह्मणास्त राजनपारयामसि॥

कलशस्थापनम् : ॐ आजिघ्रकलशं मह्या त्वा विशन्त्विन्दवः पुनरूर्ज्जा।
निवर्तस्वसानः सहस्रं धुक्ष्वोरूधारा पयस्वतीः पुनर्म्माविशताद्रयिः॥

जलपूरणम् : ॐ वरुणास्योत्तम्भनमसि वरुणस्यस्कम्भसर्ज्जनी स्थोवरूणस्य।

		ऋत सदन्यसि वरुणस्यऽऋतसदनमसि वरुणस्यऋतसदनमासीत् ॥
तीर्थजलम्	:	इमम्मे गंगे यमुने सरस्वति शुतुद्रिस्तोमे स च तापरुष्णया । मरुद्वृधे वित्तस्तयार्जीकीये श्रृणु ह्यासुषोमया ॥
गन्धक्षेप:	:	ॐ त्वां गन्धर्वाऽअखनंस्त्वामिन्द्रस्त्वां बृहस्पतिः । त्वामोषधे सोमो राजा विद्वान्यक्ष्मादमुच्यत ॥
सर्वौषधी:	:	ॐ याऽओषधीः पूर्वाजाता देवेभ्यस्त्रियुगं पुरा । मनेनु वभ्रुणामहꣳशतंधाम्मानि सप्त च ॥
दूर्वा	:	ॐ काण्डात्काण्डात्प्ररोहन्ती परूषः परूषस्परि । एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥
पंचपल्लवा:	:	ॐ अश्वत्थेवोनिषदनं पर्ण्णेवो वसतिष्कृता । गोभाजऽइत्किलासथयत्सनवसथ पुरुषम् ॥
सप्तमृतिका	:	ॐ स्योना पृथिवी नो भवानृक्षरा निवेशनी । यच्छानः शर्म सप्रथाः ॥
पंचगव्यम्	:	ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यम् भर्गो देवस्य धीमहि धियो योनः प्रचोदयात् ।
पूगीफलम् (ऋतुफलम्)	:	ॐ या फलिनीर्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः । बृहस्पति प्रसूतास्ता नो मुचन्त्वꣳहसः ॥
पंचरत्नम् (दक्षिणा)	:	ॐ परिवाजपतिः कविरग्निहव्यान्यक्रमीत् दधद्रत्नानिदाशुषे ॥
रक्तवस्त्रम्	:	ॐ सुजातो ज्योतिषा सह शर्म वरूथमामासदत्स्वः । वासोऽअग्ने विश्वरूपꣳसंव्ययस्व विभावसो ॥
पूर्णपात्रम्	:	ॐ पूर्णादवि परापत सुपूर्णा पुनरापत । वस्नेव विक्रीणावहाऽइषमूर्जꣳशतक्रतो ॥
श्रीफलम्	:	ॐ याः फलिनीर्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः । बृहस्पतिप्रसूतास्ता नो मुंचन्त्वꣳहसः ॥

वरुणावाहनम् : ॐ तत्वायामि ब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः।
अहेडमानो वरुणेह वोध्यरूशꣳसमानऽआयुः प्रमोषीः॥
अस्मिन्कलशे साङ्गं सपरिवारं सायुधं सशक्तिकं वरुणं आवाहयामि।

देवतावाहनम् : ॐ कलाः कला हि देवानां दानवानां कलाः कला।
सगृह्य निर्मितोयेन कलशस्तेन कथ्यते।
कलशस्य मुखे विष्णुर्ग्रीवायां तु महेश्वरः।
मूले तस्यस्थितो ब्रह्मामध्ये मातृगणाः स्मृताः।
कुक्षौ तु सागराः सप्त सद्वीपा वसुन्धरा।
अर्जुनी गोमती सरयू चन्द्रभागा सरस्वती।
कावेरी कृष्णवेणी च गङ्गा चैव महानदी।
तापी गोदावरी चैव माहेन्द्री नर्मदा तथा।
नदश्च विविधा जाता नद्यः सर्वास्तथा परा।
पृथिव्यां यानि तीर्थानि कलशस्थानि तानि वै॥
सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः।
ऋग्वेदोऽथ यजुर्वेद सामवेदो ह्यथर्वणः।
अङ्गैश्चसंहिताः सर्वे कलशं तु समाश्रिताः।
शान्तिः पुष्टिश्च गायत्री सावित्री कलशेस्थिताः।
आयान्तु मम शान्त्यर्थ दुरितक्षयकारकाः॥

प्रार्थना

ॐ देवदानव संवादे मथ्यमाने महोदधौ। उत्पन्नौऽसितदाकुम्भविधृतो विष्णुना स्वयम्। त्वत्तोये सर्वतीर्थानिदेवाः सर्वे त्वयिस्थिताः। त्वयितिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः। शिवः स्वयं त्वमेवासि विष्णुत्वंच प्रजापति। आदित्यावसवोरूद्राः विश्वेदेवाः सपैतृकाः॥ त्वयि तिष्ठन्ति सर्वेऽपियतः कामफलप्रदाः। त्वत्प्रसादादिमं यज्ञं कर्तृमीहे जलोद्भव। सानिध्यं कुरु मे देव प्रसन्नो भव सर्वदा। पूर्णाशाः पूर्णसंकाशः पूर्णा सर्वेमनोरथाः पूर्णकुम्भप्रसादेन पूर्णा सिद्धि भविष्यति।

॥ अथ नव ग्रह पूजन मन्त्राः ॥

ॐ आकृष्णेन रजसा वर्तमानो निवेशयनमृतं मर्त्यं च। हिरण्ययेन सवितारथेना देवोयाति भुवनानि पश्यन्॥ ॐ सूर्याय नमः ॥

ॐ इमं देवाअसपत्नꣳसुवुधं महतेक्षत्रायमहते ज्यैष्ठाय महते जान-राज्यायेन्द्रस्येन्द्रियाय इममुष्य पुत्रमुमुष्यै पुत्रमस्यै विशएष वोमी राजा सोमोस्माकं ब्राह्मणानाꣳराजा॥ ॐ चन्द्रमसे नमः ॥

ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्याअयं अपा ꣳ रेता ꣳ सिजिन्वति॥ ॐ भौमाय नमः।

ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टा पूर्ते ꣳ सृजेथा मयं च॥ अस्मिन्सधस्थे अध्युत्तरस्मिन्विश्वे देवा यजमानश्चसीदत॥ ॐ बुधाय नमः।

ॐ वृहस्पतेऽति यदर्यो अर्हाद्युमद्विभाति क्रतुमज्जनेषु। यद्वीदयच्छ वस ऋत प्रजात तदस्मासु द्रविणं धेहि चित्रम्॥ ॐ वृहस्पतयेनमः॥

ॐ अन्नात्परिस्रतो रसं ब्रह्मणा व्यपिवत्क्षत्रं पयः सोमंप्रजापतिः। ऋतेन सत्य मिंद्रयं विपान ꣳ शुक्रमन्धसइन्द्रस्योन्द्रयमिदम्पयोऽमृतंमधु॥ ॐ शुक्राय नमः॥

ॐ शन्नोदेवी रभीष्ट्य आपो भवन्तु पीतये। शंयोरभिस्रवन्तुनः॥ ॐ शनैश्चराय नमः॥

ॐ कयानश्चित्र आभुवदूती सदावृधः सखा कया शचिष्टयावृतः। ॐ राहवे नमः॥

ॐ केतुं कृण्वन्न केतवे पेशोमर्याअपेशसे समुत्षद्विरजायथाः॥ ॐ केतवे नमः॥

॥ अथ दश दिक् पाल पूजनम्॥

ॐ त्रातारमिन्द्रमवितारमिन्द्र ꣳ हवे हवे सुहव ꣳ शूरमिन्द्रम। हवयामि शक्रंपुरुहतमिन्द्रꣳस्वस्तिनोमघवाधातविन्द्रः। ॐ इन्द्राय नमः॥

ॐ अग्नि दूतं पुरोदधे हव्यवाहमुपब्रुवे देवां आसादयादिह॥ ॐ अग्नये नमः॥

ॐ यमायत्वा गिरस्वते पितृमते स्वाहा-स्वाहा धर्माय स्वाहा धर्मः पित्रे। ॐ यमाय नमः॥

ॐ एषते निर्ऋतेभागस्वं जुषस्व स्वाहा अग्निनेत्रेभ्यो देवेभ्यः पुरः सद्भ्य यमनेत्रेभ्योदेवेभ्यो दक्षिणासद्भ्यः स्वाहा विश्वदैव नेत्रेभ्यो देवेभ्यः स्वाहामित्रावरूणा-नेत्रेभ्यो वामरून्नेत्रेभ्यो वादेवेभ्य उत्तरासद्भ्यः स्वाहा सोमनेत्रेभ्यो देवेभ्यः उपरिसद्भ्यो द्युसद्भ्यः स्वाहा। ॐ नैर्ऋत्ये नमः।

ॐ इमं में वरुणश्रुधीहवामद्या च मृडय त्वामवस्युराचके। ॐ वरुणाय नमः॥

ॐ वातो वा मनो वा गन्धर्वाः सप्तविशतिः। ते अग्नेश्वमयुंजंस्ते अस्मिन् जवमादधुः॥ ॐ वायव्ये नमः॥

ॐ वयः सोम व्रते तवमनस्तनूषुविभ्रतः प्रजावन्तः सचेमहि। ॐ कुवेराय नमः॥

ॐ तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमव से हूमहेवयम्। पूषाणो यथा वेदसाम सद्वृधे रक्षितापायुरधब्दः स्वस्तये॥ ॐ ईशानाय नमः॥

(उर्ध्व ब्रह्म को ईशान तथा इन्द्र के बीच स्थापित करें। तथा अनंत को वरुण तथा नैर्ऋतिकोण के बीच स्थापित करें।)

ॐ ब्रह्म यज्ज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरूचोवेन आवः सुवुध्न्या उपमा अस्या विष्टाः सतश्चयोनि मसतश्चविवः॥ ॐ ब्रह्मणे नमः॥

ॐ नमोस्तु सर्पेभ्यो ये के च पृथिवीमनु। ये अन्तरिक्षे ये दिवितेभ्यः सर्पेभ्यो नमः॥

गायत्री पूजनम्। ॐ भूःभुवःस्वः तत्सवितुर्वरेण्यम्। भर्गो देवस्य धीमहिधियो यो नः प्रचोदयात्॥ ॐ गायत्र्यै नमः॥

।नवदुर्गा पूजनम्॥ प्रथमं शैलपुत्री च द्वितीयं ब्रह्मचारिणि। तृतीयं चन्द्रघण्टेति कूष्माण्डेति चतुर्थकम्॥ पञ्चमं स्कन्दमातेति षष्ठं कात्यायनीति च। सप्तमं कालरात्रीति महागौरीति चाष्टमम्॥ नवमं सिद्धिदात्री च नव दुर्गाः प्रकीर्तिता। उक्तान्येतानि नामानि ब्रह्मणैव महात्मना॥ ॐ नव दुर्गायै नमः॥

। सर्व देवपूजनम्॥ ॐ ब्रह्मा मुरारीस्त्रिपुरान्तकारी भानुःशशि भूमिसुतोबुधश्च। गुरुश्च शुक्रः शनि राहुकेतवः सर्वे ग्रहाः शान्ति कराः भवन्तु॥

हवन

अक्षत पुष्प से अग्नि पूजन करें—

ॐ अग्नि दूतं पुरोदधे हव्यवाहमुपब्रुवे।

देवां आसा दयादिह॥ अग्नये नमः॥

प्रार्थना—

ॐ अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम्।

हिरण्यवर्णममलं विशुद्धं सर्वतोमुखम्॥

सर्वतः पणिपादं तत् सर्वतोऽक्षि शिरो मुखम्।

वैश्वानरो महानग्निः प्रणीतः सर्वकर्मसु॥

स्रुवे से घी की आहुति दें और शेष को प्रोक्षणि पात्र में डालते जाऐं—

ॐ प्रजापतये स्वाहा, इदं प्रजापतये नमम

ॐ इन्द्राय स्वाहा, इदं इन्द्राय न मम इत्याघारौ।

ॐ अग्नये स्वाहा, इदमग्नये न मम

ॐ सोमाय स्वाहा, इदं सोमाय न मम इत्याज्य भागौ।

ॐ भूः स्वाहा इदमग्नये न मम

ॐ भुवः स्वाहा इदं वायवे न मम

ॐ स्वः स्वाहा इदं सूर्याय न मम

ॐ भूर्भुवः स्वः स्वाहा इदं प्रजापतये न मम।

ॐ त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽअवयासिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वाद्वेषाꣳसि प्रमुग्ध्यस्मत् स्वाहा। इदमग्नीवरुणाभ्यां न मम।

ॐ सत्वन्नोऽअग्नेऽवमो भवोती नेदिष्ठोऽअस्या उषसोव्युष्ठौ। अवयक्ष्वनो वरुणः रराणो व्रीहि मृडीक ः सुहवोनऽएधि स्वाहा। इदमग्नी वरुणाभ्यां न मम।

ॐ अयाश्चाग्नेऽस्यनभिशस्ति पाश्च सत्वमित्वमयाऽअसि। अया नो यज्ञं वहास्यया नो धेहि भेषजःस्वाहा। इदमग्नये अयसे न मम।

ॐ ये ते शतं वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः। तेभिर्न्नोऽअद्य सवितोत विष्णुर्विश्वेमुञ्चन्तु मरुतः स्वर्काःस्वाहा। इदं वरुणाग्नीभ्यां न मम।

ॐ उदुतमं वरुण पाशमस्मदवाधमं विध्यम ः श्रथाय। अथा वयमादित्य व्रते तवानगसोऽअदितये स्याम स्वाहा। इदं वरुणायादित्यादितये न मम।

इसके बाद चरु (हवन सामग्री) से होम करें—

ॐ गणानान्त्वा गणपतिःहवामहे ० स्वाहा

ॐ अम्बे अम्बिकेऽम्बालिके नमा ० स्वाहा

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे ० स्वाहा

ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्विसीमतऽ० स्वाहा

ॐ नमस्ते रुद्रमन्यव उतोत इषवे नमः ० स्वाहा

ॐ श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे ० स्वाहा

मातृका होम—

ॐ गौर्ये स्वाहा, ॐ पद्मायै स्वाहा, ॐ शच्यै स्वाहा

ॐ मेधायै स्वाहा, ॐ सावित्र्यै स्वाहा, ॐ विजयायै स्वाहा

ॐ जयायै स्वाहा, ॐ देवसेनायै स्वाहा, ॐ स्वधायै स्वाहा

ॐ स्वाहायै स्वाहा, ॐ मातृभ्यः स्वाहा, ॐ लोकमातृभ्यः स्वाहा,

ॐ हृष्टयै स्वाहा, ॐ पुष्ट्यै स्वाहा, ॐ तुष्ट्यै स्वाहा

ॐ आत्मदेव्यै स्वाहा।

सप्तमातृका होम—

ॐ ललितायै स्वाहा, ॐ उमायै स्वाहा, ॐ गौर्यै स्वाहा,

ॐ अम्बिकायै स्वाहा, ॐ सलिलायै स्वाहा, ॐ भगाह्यै स्वाहा,

ॐ भगाक्ष्यै स्वाहा।

नवग्रह होम—

ॐ सूर्याय स्वाहा, ॐ चन्द्रमसे स्वाहा, ॐ भौमाय स्वाहा
ॐ बुधाय स्वाहा, ॐ गुरवे स्वाहा, ॐ शुक्राय स्वाहा
ॐ शनैश्चराय स्वाहा, ॐ राहवे स्वाहा, ॐ केतवे स्वाहा

अधिदेवता होम—

ॐ त्र्यम्बकाय स्वाहा, ॐ उमायै स्वाहा, ॐ स्कन्दाय स्वाहा
ॐ विष्णवे स्वाहा, ॐ ब्रह्मणे स्वाहा, ॐ इन्द्राय स्वाहा
ॐ यमाय स्वाहा, ॐ कालाय स्वाहा, ॐ चित्रगुप्ताय स्वाहा

प्रत्यधिदेवता होम—

ॐ अग्नये स्वाहा, ॐ अद्भ्यः स्वाहा, ॐ पृथिव्यै स्वाहा
ॐ विष्णवे स्वाहा, ॐ इन्द्राय स्वाहा, ॐ इन्द्राण्यै स्वाहा
ॐ प्रजापतये स्वाहा, ॐ सर्पेभ्यः स्वाहा, ॐ ब्रह्मणे स्वाहा

पंचलोक पाल होम—

ॐ विनायकाय स्वाहा, ॐ दुर्गायै स्वाहा, ॐ यमाय स्वाहा
ॐ आकाशय स्वाहा, ॐ अश्विभ्यां स्वाहा।

दिक्पाल होम—

ॐ इन्द्राय स्वाहा, ॐ अग्नये स्वाहा, ॐ यमाय स्वाहा
ऊं नैऋतये स्वाहा, ॐ वरुणाय स्वाहा, ॐ वायवे स्वाहा
ऊं कुवेराय स्वाहा, ॐ ईशानाय स्वाहा, ॐ ब्रह्मणे स्वाहा
ॐ अनन्ताय स्वाहा, ॐ वास्तोष्पतये स्वाहा, ॐ क्षेत्रपालाय स्वाहा

ऋषि होम—

ॐ अरुन्धती सहितेभ्यः सप्तऋषिभ्यः स्वाहा, ॐ ध्रुवाय स्वाहा
ॐ अगस्त्याय स्वाहा

अनेन होमेन सूर्यादि नवग्रहाः अधिदेव प्रत्यधिदेव पंचलोकपाल दिक्पाल वास्तु क्षेत्रपालाश्च प्रीयन्ताम् न मम।

पूर्णाहुतिः मन्त्र—

ॐ मूर्द्धानं दिवो अरति पृथिव्या वैश्वानरमृत आजातमग्निम्। कविᳬसम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः स्वाहा इदमग्नये न मम।

स्रुवसे घृत धारा दें—

ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम्। देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः स्वाहा।

भस्मधारण मन्त्र—

ॐ त्र्यायुषं जमदग्नेः इति ललाटे
कश्यपस्य त्र्यायुषम् इति ग्रीवायाम्
यद्देवेषु त्र्यायुषम् इति दक्षिण बाहुमूले
तन्नो अस्तु त्र्यायुषम् इति हृदि।

धर्म शान्ति (पिण्ड दान विधि)

रक्षादीपक प्रज्वलित कर दो वस्त्र धारण किए हुए यजमान श्राद्ध स्थान में बैठकर—

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपिवा।

यः स्मरेत् पुण्डरीकाक्षं स वाह्याभ्यन्तरः शुचि॥

मन्त्र से श्राद्ध की वस्तुओं पर एवं आत्मसिंचन करे तथा पवित्र धारण करे। फिर गणपति पूजन, कलश स्थपन, नवग्रहपूजन तथा होमादि करके तदनन्तर श्वेत सरसो लेकर—

ॐ नमो नमस्ते गोविंद पुराण पुरुषोत्तम।

इदं श्राद्धं हृषीकेश रक्षतां सर्वतोदिशः॥

ॐ प्राच्यै नमः ॐ अवाच्यै नमः ॐ प्रतीच्यै नमः ॐ उदीच्यै नमः

ॐ अन्तरिक्षायै नमः ॐ श्राद्ध भूम्यै नमः।

इस प्रकार श्वेतसरसों और तिल बिखेरने के बाद नीवीं बांधे—

ॐ सोमस्य नीवीरसि विष्णोः शर्म यजमानस्येन्द्रिस्य योनिरसि सुसस्याः कृषि स्कृधि।

कुशत्रय तिलजल लेकर

ॐ तत्सदद्येति उच्चार्य अमुक गोत्रस्य पितुरमुक शर्मणे

याम्ये मार्गे तीव्र वाताश्म वृष्टि शर्करा कंटक तप्त बालुकावैतरण्यादि दोष निवृत्ति हेतुना स्वर्ग प्राप्ति कामनया अद्य सप्तदशाहदिने (त्रयोदशाहदिने) धर्मशांतिमहं करिष्ये।

प्रतिज्ञा संकल्प कर फिर तीन बार गायत्री जाप कर गणेश गौर्यादि पूजनोपरान्त होम पूर्णपात्र दान के बाद यव कुश जल लेकर—

ॐ अद्यामुक गोत्रस्य पितुरमुक शर्मणे याम्ये मार्गे तीव्र वाताश्म वृष्टि शर्करा कंटक तप्तवालुका वैतरण्यादि दोषनिवृति हेतुना स्वर्ग प्राप्ति कामनया चाद्य सप्तदशाहदिने (त्रयोदशाहदिने) धर्मशान्ति कर्मणि विष्णो इदं ते आसनं नमः ।

इसी प्रकार 'ब्रह्मन्निदं ते आसनं नमः' तथा 'शिव इदं ते आसनं नमः'।

फिर अपसव्य (दाएं कंधे पर जनेऊ) होकर दक्षिणाभिमुख कुशतिल जल लेकर— **ॐ अद्यामुकगोत्रस्य पितुरमुक शर्मणो याम्यें मार्गे तीव्र वाताश्म वृष्टि शर्करा कंटक तप्त वालुका वैतरण्यादि दोष निवृति हेतुना स्वर्ग प्राप्ति कामनया चाद्यसप्तशाह (त्रयोदशाह) दिने धर्मशान्तिकर्मणि सपरिवार यमेदं ते आसनं स्वधा नमः ।**

यम को आसन देकर फिर

ॐ अद्यामुक गोत्रस्य पितुरमुक शर्म्मणो याम्येमार्गे तीव्र वाताश्मवृष्टि शर्करा कंटक तप्त वालुका वैतरण्यादि दोष निवृत्ति हेतुना स्वर्ग प्राप्ति कामनया चाद्य सप्तदशाह (त्रयोदशाह) दिने धर्मशान्ति कर्मणि पितुरमुकशर्मन्निदं ते आसनं स्वधा ।

इस प्रकार पितर को आसन देकर तदनन्तर उत्तराभिमुख सव्य (बाएं कंधे पर जनेऊ) कर कुशत्रय लेकर

ॐ विष्णोरराटमसि विष्णोः श्नप्त्रेस्थो विष्णो स्यूरसि विष्णो ध्रुवोसि वैष्णवमसि विष्णवे त्वा ।

मन्त्र से विष्णु का आवाहन कर फिर

ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोवेन आवः सवुध्न्या उपमा अस्य विष्ठाः सतश्च योनि मसतश्च विवः । ब्रह्मणे नमः

ब्रह्म का आवाहन कर तदनन्तर

ॐ नमस्ते रुद्रमन्यव उतोत उषवे नमः वाहुभ्यां उतते नमः । शिवाय नमः

शिव आवाहनकर तीनों आसनों पर '' ॐ यवोसि यवयास्मद्वेषो यवयाराति '' जौ डालकर अपसव्य (जनेऊ दाएं कंधे पर) कर

ॐ सुगन्नु पंथां प्रदिशं न एहि ज्योतिषाद्धेह्य जरन्न आयुः
अपैतु मृत्युरमृतं म आगाद्वैवस्वतो नो अभयं कृणोतु । यमाय नमः

यम का आवाहन कर

ॐ आयन्तुनः पितरः सोम्यासो अग्निष्वाताः पथिभिर्देव यानैः

अस्मिन्यज्ञे स्वधयामादंतोऽधिव्रवंतु तेवंन्त्वस्मान्।

पितृ आवाहन कर 'ॐ अपहता असुरा रक्षा ः सिवेदिषदः'

तिल डाल कर यज्ञोपवीत सव्य कर विष्णु ब्रह्म और शिव के अर्घ्यपात्रों पर पवित्र (कुश) रखें—

ॐ पवित्रेस्थौ वैष्णव्यो सवितुर्व प्रसव उत्पनाम्य छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः, तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम्॥

तदनन्तर जल डालें—

ॐ शन्नो देवी रभीष्टय आपो भवन्तु पीतये शंय्योरभिस्त्रवन्तु नः।

फिर जौ डालने के बाद अर्घ्यपात्र को दाएं हाथ में कर

ॐ या दिव्या आपः पयसा संवभूवुर्या अंतरिक्ष उत्पार्थवीर्या हिरण्य वर्णा यज्ञियास्तान आपः शिवा सः स्योना सुहवा भवन्तु

पढ़कर जौ कुश जल ले कर

ॐ अद्यामुकगोत्रस्य पितुरमुकशर्मणो धर्मशांतिकर्मणि विष्णो एष ते अर्घो नमः, इसी प्रकार ब्रह्मन् एष ते अर्घो नमः।

तथा 'शिव एष ते अर्घो नमः।'

विष्णु ब्रह्म एवं शिव को अर्घ्य देकर पात्र सीधा रख दें तथा —

विष्णो इदं ते स्थानमसि।

ब्रह्मन्निदं ते स्थानमसि।

शिवेदं ते स्थानमसि।

अर्घ्यपात्रों का स्पर्श कर तदनन्तर अपसव्यकर यम एवं पितर के अर्घ्यपात्रों पर पवित्र रख जल डालकर 'ऊं अपहता असुरा रक्षा ः सिवेदिषदः' से तिल डालें फिर 'ऊं या दिव्या आप' इत्यादि मन्त्र पढ़ कर अभिमन्त्रित कर तिल कुश जल ले कर—

ॐ अद्यामुक गोत्रस्य पितुरमुक शर्मणो धर्मशान्ति कर्मणि सपरिवार यम एष ते अर्घ्यः स्वधा नमः ।तथा

'ॐ अद्यादि पूर्ववत् पितुरमुक शर्मन्नेषतेऽर्घः स्वधा' से यम एवं पितर को अर्घ्य देकर पात्र उल्टा रख दें।

'सपरिवार यम इदं ते स्थानमसि।'

'पित्रे स्थानमसि' अर्घ्यपात्रों का स्पर्श करें। फिर सव्य हो गन्ध पुष्पादि विष्णुब्रह्म शिव आदि को निवेदित कर

ॐ अद्यामुक गोत्रस्य पितुरमुक शर्मणो धर्मशान्ति कर्मणि विष्णो एतानि गंधपुष्प धूप दीपैला लवंग पूगीफल तुलसीदल यज्ञोपवीत तांबूल वासांसि ते नमः।

इसी प्रकार ब्रह्म शिव के लिए भी गंध पुष्पादि निवेदन कर संकल्प करें। तदनन्तर अपसव्य कर यम और पितर के लिए गन्धादि देकर—

'ॐ अद्यामुक गोत्रस्य पितुरमुक शर्माणो धर्मशान्ति कर्मणि सपरिवार यम एतानि यथासंभव गंधादीनि ते स्वधा नमः।'

तथा 'एवमेव पित्रे स्वधा।'

फिर यज्ञोपवीत सव्य कर जल में अन्न से दो आहुतियां डालें—

'ॐ अग्नये कव्यवाहनाय स्वाहा'

'ॐ सोमाय पितृमते स्वाहा।'

तदनन्तर अपसव्य कर 'ॐ इदमन्नमेतद् भूस्वामि पितृभ्यो नमः' कुशाओं पर अन्न छोड़ दें।

जनेऊ सव्य कर विष्णु आदि के भोजन पात्र पर अन्न परिवेषण कर

ॐ मधुवाता ऋतायते इत्यादि मन्त्र से मधु दान कर उत्तान हाथों से पात्र स्पर्श कर

ॐ पृथिवी ते पात्रम्— इत्यादि मन्त्र से दक्षिण अंगुष्ठ से स्पर्शकर 'ॐ यवोसीति' मन्त्र से यव (जौ) बिखेर कर जो कुशजल लेकर

ॐ अद्यामुक गोत्रस्य पितुरमुकशर्मणो धर्मशान्ति कर्मणि परिविष्टं परिवेष्यमाणमेक ब्राह्मण तृप्ति पर्यन्तं विष्णो इदं ते अन्नं नमः।

इसी प्रकार

'ब्रह्मन् इदं ते अन्नं नमः'

शिव इदं ते अन्न नमः।

कहते हुए जल छोड़ दें।

तदनन्तर अपसव्य होकर यम और पितर के लिए भोजनपत्र पर अन्न परिवेषण पूर्वक 'ॐ मधुबाता' मन्त्र से मधु दान कर अनुत्तान (उल्टे) हाथों से पात्र स्पर्श कर

ॐ पृथिवी ते पात्रमिति मन्त्र से अंगुष्ठ स्पर्शकर 'ॐ अपहता असुरारक्षा' इत्यादि मन्त्र से तिल बिखेर कर तिलकुश जल लेकर

ॐ अद्यामुकगोत्रस्य पितुरमुक शर्मणो धर्मशान्ति कर्मणि परिवष्टिं परिवेष्यमाणमेक ब्राह्मण तृप्ति पर्यन्तं विष्णो इदं ते अन्नं नमः।

इसी प्रकार

'ब्रह्मन् इदं ते अन्नं नमः

शिव इदं ते अन्नं नमः'

कहते हुए जल छोड़ दें।

तदनन्तर अपसव्य होकर यम और पितर के लिए भोजनपात्र पर अन्न परिवेषणपूर्वक 'ॐ मधु वाता...' मन्त्र से मधु दानकर अनुत्तान (उल्टे) हाथों से पात्र स्पर्शकर

ॐ पृथिवी ते पात्रमिति मन्त्र से अंगुष्ठ स्पर्श कर

ॐ अपहता... इत्यादि मन्त्र से तिल बिखेर कर तिलकुश जल लेकर

ॐ अद्यामुकगोत्रस्य पितुरमुक शर्मणो धर्मशान्ति कर्मणि परिविष्टं परिवेष्यमाणमेक ब्राह्मण तृप्ति पर्यन्तं स परिवार यम एतत्तेऽन्नंस्वधानमः

इसी प्रकार—'अमुक शर्मणे पित्रे एतत्तेऽन्नं स्वधा'

कहते हुए जल छोड़े।

ॐ अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत्।

तत्सर्वमच्छिद्रमस्तु

प्रार्थना कर तीन बार गायत्री जापकर अपसव्य से

ॐ अग्निदग्धाश्चये जीवा ये प्रदग्धा कुलेमम।

भूमौ दत्तेन तृप्यन्तु तृप्ताः यान्ति परां गतिम्।

अन्न छोड़ दें। तदनन्तर सव्य अपसव्य से आचमन के लिए जल दें। तदनन्तर सव्य अपसव्य से पिण्ड के लिए दो वेदियों का निर्माण कर कुशा से सात-सात रेखाएं करें—

ॐ अयोध्या मथुरा माया काशी कांची अवन्तिका।

पुरी द्वारावती ज्ञेया सप्तैते मोक्षदायिकाः॥

कुशा को ईशान कोण में फैकें फिर जल से सींच कर

ॐ ये रुपाणि प्रतिमुञ्च माना असुराः सन्तः स्वधया चरन्ति।
परापुरो निपुरो ये भरन्त्यग्निष्ठांल्लोकान् प्रणुदात्वस्मात्॥

मन्त्र से जलती हुई शलाका वेदिका पर घुमा कर दक्षिण की ओर छोड़ दें, तदनन्तर जड़ रहित तीन कुशाऐं वेदिकाओं पर रखें। (उपरोक्त सभी कृत्य ब्रह्मादि के लिए सव्य तथा यम, पितर के लिए अपसव्य जनेऊ से करें) फिर यज्ञोपवीत सव्यकर जौ, जल, गंध पुष्प लेकर–

ॐ अद्यामुक गोत्रस्य पितुरमुक शर्म्मणो धर्मशान्ति कर्मणि विष्णोऽत्रावनेनिक्ष्वते नमः इसी प्रकार ब्रह्मा और शिव के लिए अवनेजन दें।

तदनन्तर अपसव्य होकर सपरिवार यम एवं पितर के लिए गंधपुष्प जल तिल लेकर–

ॐ अद्यामुकगोत्रस्य पितुरमुकशर्मणः धर्मशान्तिकर्मणि सपरिवारयम अत्राऽवनिक्ष्वते स्वधा नमः।

पितर के लिए– **'पित्रे स्वधा'**।

फिर जनेऊ सव्यकर घृत, जौ, मधु मिश्रित अन्न से तीन पिण्डों का निर्माण कर जल लेकर–

ॐ अद्यामुक गोत्रस्य पितुरमुक शर्मणो धर्मशान्तिकर्मणि विष्णो एष ते पिंडो नमः। 'ब्रह्म एष ते पिंडो नमः' शिव एष ते पिंडो नमः। अपसव्य होकर घृत, तिल, मधुमिश्रित अन्न से दो पिण्ड बना कर हाथ में जल लेकर–

ॐ अद्यामुक गोत्रस्य पितुरमुकशर्मणो धर्मशान्ति कर्मणि सपरिवार यम एष ते पिण्डः स्वधा नमः। 'पित्रे एषते पिण्डः स्वधा'। तदनन्तर 'लेपभागभुजस्तृप्यन्तु' कुशमूल (जड़) से हस्त प्रोक्षणकर–

ॐ अत्र सपरिवार यममादयस्व यथा भागमावृषायस्व। मन्त्र से श्वास रोकर पितर मूर्ति का ध्यान करते हुए दक्षिण दिशा की ओर देखते हुए श्वास छोड़ दें।

उसके बाद सव्य होकर यव, जल, गंध, पुष्प लेकर–

ॐ अद्यामुक गोत्रस्य पितुरमुक शर्मणो धर्मशान्ति कर्मणि विष्णोऽत्र प्रत्यवनेनिक्ष्वते नमः

पिण्ड के ऊपर प्रत्यवनेजन छोड़ दें।

इसी प्रकार—

'ब्रह्मन् अत्र प्रत्यवनेनिक्ष्वते नमः।'

शिव अत्र प्रत्यवनेनिक्ष्वते नमः। ब्रह्मा और शिव के पिण्ड पर प्रत्यवनेजन छोड़ें।

अपसव्य कर तिल, जल, गंध, पुष्प लेकर—

ॐ अद्यामुक गोत्रस्य पितुरमुक शर्मणः धर्मशान्तिकर्मणि सपरिवारयम पिण्डोपरि प्रत्यवनेनिक्ष्वते स्वधा नमः। पित्रे प्रत्यवनेनिक्ष्वते स्वधा।

यम और पितर के लिए प्रत्यवनेजन छोड़ कर नीवीं विसर्जन तदनन्तर सव्य होकर आचमन कर सूत्र अथवा वस्त्र लेकर—

ॐ नमस्ते विष्णो रसाय नमस्ते विष्णो शोषाय नमस्ते विष्णो जीवाय

नमस्ते विष्णो स्वधायै नमस्ते विष्णो घोराय नमस्ते विष्णो मन्यवे

नमस्ते विष्णो विष्णो नमस्ते विष्णो देहि गृहान्नो सतस्ते विष्णो

देष्मैतत्ते विष्णो वासः।विष्णु पिण्ड पर सूत्र रखें इसी प्रकार

ॐ नमस्ते ब्रह्मन रसायति..इत्यादि से ब्रह्मपिण्ड पर ओर

ॐ नमस्ते रुद्र रसाय..इत्यादि मन्त्र से रुद्रपिण्ड पर सूत्र रखें फिर अपसव्य होकर वस्त्र अथवा सूत्र लेकर—

ॐ नमस्ते यम रसाय...इत्यादि मन्त्र से यमपिण्ड पर सूत्र दें और ॐ नमस्ते पिता रसाय...इत्यादि मन्त्र से पितर पिण्ड पर सूत्र या वस्त्र चढ़ाऐं फिर सव्य, अपसव्य से संकल्प करें। तत्पश्चात् सव्य अपसव्य से पांचों पिण्डों पर गंध, पुष्प, धूप, दीप, ताम्बूल, नैवेध चढ़ा कर—

ॐ शिवा आपः सन्तु इति जलं

ॐ सौमनस्यमस्तु इति पुष्पं

ॐ अक्षतं चारिष्टमस्तु इति तण्डुलान् क्षिपेत्

जल पुष्प चढ़ा कर सव्य होकर—

ॐ अद्यामुकगोत्रस्य पितुरमुकशर्मणो धर्मशान्ति कर्मणि विष्णु दत्तेतदन्नपानादिकमक्षय्यमस्तु— जल छोड़ दें।

ॐ... ब्रह्मन दत्तेतदन्नपानादिकमक्षय्यमस्तु

ॐ...शिव दत्तेतदन्न पानादिकमक्षय्यमस्तु ब्रह्म और शिव के लिए संकल्प

छोड़कर अपसव्य होकर सपरिवार यम के लिए भी संकल्प कर पितर के लिए अन्नपानादि संकल्प करें—

ॐ अद्यामुकगोत्रस्य पितुरमुक शर्मणो दत्तैतदन्न पानादिकम-क्षय्यमुपतिष्ठताम्।

तदनन्तर सव्य होकर—

ॐ अघोरो विष्णुरस्तु।

ॐ अघोरो ब्रह्माअस्तु।

ॐ अघोरः शिवोस्तु।

ॐ अघोरः सपरिवारयमरस्तु।

ॐ अघोरः पिता अस्तु।

पश्चिम से पूर्व की ओर सब पिण्डों पर जल छोड़ दें और प्रार्थना करें—

ॐ गोत्रन्नो वर्द्धतां दातारोनोभि वर्द्धतां वेदः संततिरेव च।

श्रद्धा च नोमाव्यगमद् बहुदेयं च नोऽस्त्विवति अन्नं च

नोवहु भवेदतिथींश्चलभेमहि याचितारश्चनः संतु मा च

याचिष्मकंचन ऐता सत्या आशिषः संतु॥

उत्तर दक्षिण की ओर तत्पश्चात् पिण्डों पर कुशाऐं रखकर जल ओर दूध की धारा दें—

ॐ ऊर्जं बहंतीरमृतं घृतं पयः कीलालं परिस्रुतं

स्वधास्थतर्पयत् मे पितरम्।

फिर यम और पितृ पात्र सीधे कर सव्य होकर दक्षिणादान करें—

ॐ अद्येत्यादि संकीर्त्य कृतैतत्धर्मशान्ति पितृ श्राद्ध प्रतिष्ठार्थं दक्षिणा द्रव्यं यथानामगोत्राय ब्राह्मणाय दातुमहमुत्सृजे (तुम्यमहंसंप्रददे)।

तदनन्तर अपसव्य होकर पितृविसर्जन करे—

ॐ बाजे बाजे वतवाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः।

अस्य मध्वः पिबतमादयध्वं तृप्ता यात पथिभिर्देवयानैः॥

फिर यमविसर्जन करें—

ॐ सयातुकासरारुढः कासरासमेन तद्गुणा

गताऽस्मिन्मध्वातृप्ता स्वतेजसः व्रजंतु ॥

यज्ञोपवीत सव्य कर—

ॐ मानस्तोके तनयेमान आयुषि मानो गोषुमानोऽश्वेषुरीरिषः ।

मानो वीरान्नुद्रभामिनो वधीर्हविष्मंतः सदमित्वा हवामहे ॥

शिव विसर्जन कर

ॐ अग्नि मीले पुरोहितं यज्ञस्य देवमृत्विजम् ।

होतारं रत्न धातमम् ।

ब्रह्म विसर्जन कर—

ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।

स दाधार पृथ्वीं द्यामुत्तेषां कस्मै देवाय हविषा विधेम ॥

विष्णु विसर्जन कर—

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्यः एवच ।

नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥

इस मन्त्र का तीन बार जाप कर अपसव्य होकर रक्षादीप बुझाकर सव्य होकर हाथ पैर धोकर आचमन कर

ॐ प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।

स्मरणादेव तद् विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥

इस मन्त्र को पढ़े

शय्या दान

तदनन्तर शय्यादान के लिए गणेशादि पूजन कर शय्या पर '' ॐ कांचन पुरुषाय नमः'' पुष्प चढ़ा कर 'ॐ सोपकरण शय्यायै नमः' शय्या की पूजा कर शय्या के चारों पाद धोकर—'ॐ ब्राह्मणाय नमः' पाद्य, अर्घ्य आचमनादि पूर्वक ब्राह्मण की पूजा कर वरण करें—

ॐ अद्येत्यादि संकीर्त्य अमुकगोत्रस्य अमुक शर्मणः पितुः धर्मशान्ति कर्मणि सोपकरण शय्या दानार्थं अमुकगोत्रोत्पन्नं अमुक शर्माणं ब्राह्मणं त्वामहं वृणे—वृतोऽस्मीति प्रतिवचनम् ।

फिर ब्राह्मण को तिलक चन्दन कर हाथ में जल लेकर—

ॐ अद्य सदद्य संकीर्त्य अमुक गोत्रस्य पितुरमुक शर्मणः पारलौकिक विमानारोहण दिव्य देहत्व महेश्वर पुर गमन पूर्वकं शुभ तूलिकास्तरण प्रावार निधानाच्छादन वस्त्र तन्तु समसंख्य वर्ष सहस्रावच्छिन्न विष्णु लोक वासकामः इमां वरशय्यां नाना विधोपकरणान्वितां विष्णु दैवतां अमुक गोत्र शर्म्मणे ब्राह्मणाय तुभ्यमहं संप्रददे।

फिर वस्त्र दान के लिए संकल्प—

ॐ तत्सदद्यामुकगोत्रस्य पितुरमुक शर्मणः पारलौकिक महारौद्र कराल रूप यमभटेभ्यः पीडा निवृत्यर्थं एतद्वस्त्रतन्तु समवर्ष सहस्रावच्छिन्न स्वर्गलोक प्राप्तिकामनया इमानि वासांसि वृहस्पति दैवतानि यथानाम गोत्राय ब्राह्मणायाऽहं संप्रददे।

फिर पात्रादिदान के लिए संकल्प करे—

ॐ तत्सदद्यामुकगोत्रस्य पितुरमुक शर्मणः इमानि पात्राणि कांस्य पैत्तल लोहमयानि त्वष्ट्र दैवतानि तथैव छत्रमुत्तानांगिरो दैवतं, पारत्रिक याम्य मार्गस्थ सर्वकंटकादि निवारणार्थं इमे उपानहावुत्तानांगिरो दैवते, पारत्रिक सुख प्राप्तिपूर्वक स्वर्ग प्राप्ति कामनया इमे वरकाष्ठ पादुके विष्णुदैवते अमुक गोत्राय ब्राह्मणाय तुभ्यमहं संप्रददे।

फिर दक्षिणा दान करें—

ॐ तत्सदद्यामुकगोत्रस्य पितुरमुक शर्मणः धर्म शान्तिकर्मणि कृतैतत् शय्यादान वस्त्रोपानद् पात्रादि दान दक्षिणासांगता सिद्धयर्थं दक्षिणाद्रव्यं अमुकगोत्राय ब्राह्मणाय तुभ्यमहं संप्रददे।

गौदान

गोदान दक्षिणा संकल्प करें—

ॐ तत्सदद्येत्यादि अमुक गोत्रस्य पितुरमुक शर्मणः यममार्गे वैतरणि तर्तुकामः गौरभावेन दक्षिणा द्रव्यं अमुकगोत्राय ब्राह्मणाय तुभ्यमहं संप्रददे।

फिर चारपाई और ब्राह्मण की प्रदक्षिणा कर आशीर्वाद ले।

तदनन्तर त्रयोदश पददान के लिए संकल्प करे—

ॐ अद्यामुक गोत्रस्य पितुरमुक शर्मणः पारलौकिक सुखासन विश्राम कामः चिरकाल स्वर्गलोक वासोतर विष्णुपुर गमन कामनया च इमानि त्रयोदश पदानि

नानादैवतं गंधपुष्पपूंगीफल यज्ञोपवीत वस्त्रासन पात्र उपानत् दक्षिणादि वस्तूनि नानानाम गोत्रेभ्यो ब्राह्मणेभ्योऽहं संप्रददे!

यष्टिव्यजन (पंखा) दान हेतु संकल्प—

ॐ अद्यामुक गोत्रस्य पितुरमुक शर्मणः पारत्रिक सुख यममार्गान्निवृत्य विरुद्ध जीव निवारण पूर्वक सुख स्पर्श शीतल वाय्वर्थं इमे यष्टिव्यजने वनस्पति वायुदैवते यथानाम गोत्राय ब्राह्मणाय दातुमहमुत्सृजे।

जलपूर्ण कलश दान के लिए संकल्प—

ॐ तत्सदद्येत्यादि अमुकगोत्रस्य पितुरमुकशर्मणः पारलौकिक प्रपा सहस्र दान सम फल प्राप्ति कामः जलपूर्ण कलशं सवस्त्रं वरुणदैवतं अमुकगोत्रााय ब्राह्मणाय अहं संप्रददे।

फिर ब्राह्मण भोजन संकल्प कर तदनन्तर काक, श्वान, वरुण, सर्प और गोवलि संकल्प करे। तदनन्तर पूर्णाहुति, आशीर्वाद, देवविसर्जन, अग्निविसर्जन करे। सूर्य को अर्घ्य देकर पवित्र मोक्षणकर कार्य समाप्ति करें— इति शुभम्॥

अथ शुद्धचातुर्वार्षिक त्रिपौरुष श्राद्ध विधिः

अपराह्ने स्नातः शुक्लद्विवासाः शुचिराचान्तः रेखावेष्टितं श्राद्धदेशमागच्छेत्। तत्र प्राङ्मुख उपविश्य सिद्धान्न सम्भवे सिद्धमिति पाचंक पृष्ट्वा पवित्रे घृत्वा श्राद्धमारभेत्।

आत्माभिषिञ्चनम्—**ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपिवा।**

यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥

त्रिकुशजलैः श्राद्धवस्तु सेचनम्—**ॐ पुण्डरीकाक्षः पुनातु।**

ततो भूमि सूर्य दीप धूपादि पूजान्ते सर्षप तिलकुशैः॥

दिग्बन्धनम्—**ॐ नमो नमस्ते गोविन्द पुराण पुरुषोत्तम।**

इदं श्राद्धं हृषीकेश! रक्षतां सर्वतो दिशः॥

ॐ प्राच्यै नमः, अवाच्यै नमः, प्रतीच्यै नमः, उदीच्यै नमः, अन्तरिक्षाय नमः, श्राद्ध भूम्यै नमः। इति दिक्षुतिलसर्षपविकरणदवशेषरक्षाद्रव्येण नीवी बन्धनं कार्यम्।

अपसव्येन नीविबन्धः— ॐ सोमस्य नीवीरसि विष्णोः शर्मासि शर्म यजमान स्येन्द्रस्य योनिरसि सुसस्याः कृषि स्कृधि॥ नीवीबतैव पितृ दैवत्यं कृत्यं कार्यम्।

विष्णु ध्यानम्— **ॐ अतसीपुष्पसंकाशं पीतवाससमच्युतम्।**

प्रारम्भे कर्मणां विप्र पुण्डरीकं स्मेरद्धरिम्॥

गयागदाधरयोर्ध्यानम्— **श्राद्धकाले गयां ध्यात्वा ध्यात्वा देवं गदाधरम्।**

मनसा च पितृन्ध्यात्वा ततः श्राद्ध समारभेत्॥

सव्येन त्रिकुशतिलजलैः संकल्पः— ॐ तत्सदद्यामुक गोत्रस्य पितुरमुक शर्मणः **विश्वेदेवपूर्वकं सपात्रिक शुद्ध चातुर्वार्षिकश्राद्धमहं करिष्ये।**

लक्ष्मी नारायण पूजा— **शालग्रामादि प्रतिमायां षोडशोपचारैः लक्ष्मीनारायणौ सम्पूज्य श्राद्धभुवः सन्निधौ संस्थाप्य गायत्रीं त्रिर्जपेत्।**

गायत्र्यास्त्रिर्जपः— **ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च।**

नमः स्वाहायै स्वाधायै नित्यमेव नमो नमः ॥

तत् उत्तराभिमुखो दक्षिणोत्तरक्रमासादित कुशत्रयात्मकासन चतुष्टयं सयवमुत्सृजेत्। सव्यं कृत्वा

विश्वेदेवेभ्य : 4 आसनदानम्— ॐ अद्येत्यादि अमुकगोत्रस्य पितुरमुकशर्मणः विश्वे देव पूर्वक शुद्धचातुर्वार्षिक त्रि पौरुष श्राद्धे गोत्राणां पितृ पितामह प्रपितामहानाम् अमुकामुकशर्मणाम् त्रिपौरूष शुद्ध श्राद्ध सम्बन्धिनो विश्वे देवा एतानि आसनानि चतुर्धा विभज्य वो नमः॥ इति विश्वेषां देवानां चतुर्धासनानि सयवमुत्सृजेत् ततो पऽसव्यं कृत्वा पातितवामजानुर्दक्षिणाभिमुखो द्विगुण भुग्न कुशत्रयतिलजलान्यादाय पूर्वपश्चिमसादित मोटकरूपाणि द्विगुण भुग्न कुशत्रयतिलजलान्यादाय पूर्वपश्चिमासादित मोटकरूपाणि नवासनानि तिल जल प्रोक्षितानि त्रीणित्रीण्यासनानि पितृ पितामह प्रपितामहेभ्यः पश्चिमत आरभ्य उत्सृजेत्।

पित्रेआसनदानम्— ॐ अद्यामुकगोत्रे पितरमुकशर्मा शुद्ध चातुवार्षिक त्रिपौरुष श्राद्धे एतानि आसनानि त्रिधाविभज्यते स्वधा।

पितामहाय आसनदानम्— ॐ अद्यामुक गोत्रस्य पितुरमुकशर्मणः शुद्ध चातुर्वार्षिक त्रिपौरूष श्राद्धे गोत्रे पितामह अमुकशर्मा एतानि आसनानि त्रिधा विभज्य ते स्वधा।

प्रपितामहाय— ॐ अद्यामुकगोत्रस्य पितुरमुक शर्मणः शुद्ध चातुर्वाषिक त्रिपौरुष श्राद्धे गोत्रे प्रपितामहः अमुकशर्मा एतानि आसनानि त्रिधा विभज्यते स्वधा। ततः सव्येन—

कृतांजलिः— ॐ विश्वान्देवानमहमावाहयिष्ये।

विश्वेदेवावाहनम्— ॐ विश्वेदेवासऽआगत श्रृणुता मऽइमꣳहवम्।

एदं बर्हिर्निषीदत।

यवविकरणम्— ॐ यवोऽसि यवयास्मद् द्वेषो यवयारातीः।

विश्वेदेवपूजनम्— ॐ विश्वेदेवाः श्रृणुते इमꣳहवम्। येमेऽअन्तरिक्षे यऽउपद्य विष्ठयेऽअग्निजिह्वा उतवायजत्राऽआसद्यास्मिन् बर्हिषि मादयध्वम्॥

पुराणपाठः— ॐ आगच्छन्तु महाभागा विश्वेदेवा महाबलाः।

ये यत्र योजिता श्राद्धे सावधाना भवन्तु ते॥

ततोऽ पसव्यंकृत्वा दक्षिणाभिमुखः।

कृताञ्जलिः— ॐ पितुरहमावाहयिष्ये।

पित्रादीनामावाहनम्— ॐ उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि।

उशन्नुशत ऽआवह पितुर्हविषेऽअत्तवे।

तिलविकरणम्— ॐ अपहताऽअसुरारक्षꣳसिवेदिषदः। इति तिलान्विकीर्य।

पित्रादिपूजनम्—ॐ आयन्तु नो पितरः सोम्यासोऽग्निष्वात्ताः पथिभर्देवयानैः।

अस्मिन्यज्ञे स्वधया मदन्तोऽधिब्रुवन्तुते अवन्त्व अस्मान्। ततः सव्यं कृत्वा देवार्घपात्रचतुष्टये।

देवार्घपात्रेषु पवित्रक्षेपः— ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्य च्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः॥ तस्यते पवित्रपते पवित्रषूतस्य यत्कामः पुनेतच्छकेयम्॥

जलक्षेपः— ॐ शन्नो देवीरभिष्टय ऽआपोभवन्तु पीतये।

शंयोरभि स्रवन्तु नः॥

यवक्षेपः— ॐ यवोऽसि यवयास्मद्द्वेषो यवयारातीः। इतियवान्प्रक्षिप्य ततोऽप-सव्येन पित्रादि नवार्घपात्रेषु प्रत्येकपवित्रजल तिलान्क्षिप्य

पित्राद्यर्घपात्रेषु पवित्रक्षेपः— ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्व०।

जलक्षेपः— ॐ शन्नोदेवीरभिष्टय०

तिलक्षेपः— ॐ तिलोऽसि सोमदैवत्यो गोसवो देवनिर्मितः प्रत्नमद्भिः प्रत्तः स्वधया पितृं (मातृं) ल्लोकान् प्रीणाहिनः स्वाहा। इतितिलान्। ततः सव्यंकृत्वा देवार्घ पात्रं वाम हस्तेकृत्वा तत्र स्थित पवित्रं देवभोजन पात्रे पूर्वांग्रधृत्वातदुपरिकिंचिदुदकान्तरन्दत्वा।

देवार्घपात्रा भिमन्त्रणम्— ॐ यादिव्याऽआपः पयसासम्बभूर्याऽअन्तरिक्षाऽ-उत्पार्थिवींर्याः। हिरण्यवर्णा यज्ञियास्तानाऽआपः शिवाः शꣳस्योनाः सुहवा भवन्तु। इति पठित्वा यवजलकुशान्यादाय।

देवेभ्योहस्तार्घदानम्— ॐ अद्यामुक गोत्रस्य पितुरमुकशर्मणः विश्वेदेवपूर्वक शुद्ध चातु र्वार्षिक त्रिपौरुष श्राद्धनिमित्तकानां अमुकामुकशर्मणां त्रिपौरुषश्राद्ध सम्बन्धिनः पुरुरवार्द्रसंज्ञका विश्वेदेवा एष वौ हस्तार्घश्चतुर्धा विभज्य नमः। इत्यर्घंददुत्सृजेत् ततोऽऽपसव्यं कृत्वा पित्राद्यर्घपात्रेषु नवस्वपितूष्णीमेव गन्धपुष्पे प्रक्षिप्य पित्राद्यर्घपात्र वामहस्ते कृत्वा तत्रस्थितं पवित्रं पित्रादिभोजनपात्रेषु उत्तराग्रंधृत्वा तदुपरि किञ्चिदुदकान्तरंदत्वा

पित्रर्घपात्राभिमन्त्रणम्— ॐ यादिव्याऽआप: पयसा सम्बभुर्याऽअन्तरिक्षा उत्पार्थिवीर्या। हिरण्यवर्णा यज्ञियास्तान ऽआप: शिवा: शꣳ स्योना: सुहवा भवन्तु। इति पठित्वा मोटकतिलजलान्यादाय।

पित्रे हस्तार्घदानम्— ॐ अद्यामुकगोत्रे पितरमुकशर्मा शुद्ध चातुर्वार्षिक त्रिपौरुष श्राद्धे एष ते हस्तार्घस्त्रिधा विभज्यस्वधा।

पितामहाय हस्तार्घदानम्— ॐ अद्यामुकगोत्रस्य पितुरमुकशर्मण: शुद्ध चातुर्वार्षिक त्रिपौरुषश्राद्ध निमित्तिकामुक गोत्रे पितामह: अमुक शर्म एष ते हस्तार्घ: त्रिधा विभज्य स्वधा।

प्रपितामहाय हस्तार्घदानम्— ॐ अद्यामुकगोत्रास्य पितुरमुकशर्मण: शुद्ध चातुर्वार्षिक त्रिपौरुषश्राद्धनिमित्तकामुकगोत्रे प्रपितामह: अमुकशर्मा एषते हर्स्तार्घ: त्रिधाविभज्य स्वधा। तत: सव्यंकृत्वा पवित्रसहितमवशिष्ट जलयुत देवार्घपात्रचतुष्टयं प्रत्येकं देवासनदक्षिण पार्श्वे।

देवार्घपात्राणामुत्तानेनस्थापनम्— ॐ विश्वेभ्योदेवभ्य: स्थानमसि। इत्युत्तानमेव धारयेत्। अपसव्यं कृत्वा किंचित्प्रपितामहस्यर्घपात्रेस्थित पवित्रादीनि पितामहस्यर्घपात्रे कृत्वा तनि सर्वाणि पित्रर्घपात्रेकृत्वा पित्रर्घपात्रं पिता-महस्यर्घ पात्रोपरि तदुभ्यं पितामहस्यर्घपात्रोपरि धृत्वा पित्रासनवामपार्श्वे।

पित्रा द्यर्घपात्राणांन्यूब्जी कृत्यस्थापनम्— ॐ पितृ पितामह प्रपितामहेभ्य: स्थानमसि। इति मिलितान्येवन्युब्जी कुर्यात् तथा स्थापितानि च तानि-दक्षिणादान पर्यन्तं नोद्धरेत् न चालयेत्। आवृतास्तत्रतिष्ठन्ति पितर: श्राद्ध देवता:॥ तत: सव्यं कृत्वा यवकुशजलान्यादाय

देबेभ्यो गन्धादि (पदक) दानम्— ॐ अद्यामुक गोत्रस्य पितुरमुक शर्मण: विश्वे देवपूर्वक शुद्ध चातुर्वार्षिक त्रिपौरुष श्राद्धनिमित्तकममुकगोत्राणां पितृपितामह प्रपितामहानां त्रिपौरुष श्राद्धसम्बन्धिनी विश्वेदेवा एतानि गन्धाक्षत धूपदीप यज्ञोपवीत ताम्बूल रौप्यमयकमण्डलु करपात्र स्वर्णमयांगुलीयककाष्ठपादुकोर्णासन कार्पास धौतोत्तरीयानि चतुर्धा विभज्य वो नम:। इति यथा सम्भवमुत्सृजेत्। ततो ऽपसव्यंकृत्वा मोटक तिलजलन्यादाय।

पित्रे गन्धादि (पदक) दानम्— ॐ अद्यामुक गोत्रे पितुरमुक शर्मा शुद्ध चातुर्वार्षिक त्रिपौरुष श्राद्धे एतानि गन्धाक्षत धूपदीप यज्ञोपवीतताम्बूल रौप्यमय कमण्डलु करपात्रस्वर्णमयाङ्गुलीयककाष्ठापादुकोर्णासन कार्पास धोतोत्तरीयानि त्रिधा विभज्यते स्वधा।

पितामहाय गन्धादि (पदक) दानम्— ॐ अद्यामुक गोत्रस्य पितुरमुक शर्मण: शुद्ध चातुर्वार्षिक त्रिपौरुष श्राद्धेऽमुक गोत्रे पितामह: अमुक शर्मा एतानि गन्धाक्षत धूपदीप यज्ञोपवीत ताम्बूल रौप्यमय कमण्डलुकरपात्र स्वर्ण-मयाङ्गुलीयककाष्ठपादुकोर्णासनकार्पासधौतोत्तरीयानि त्रिधाविभज्य ते स्वधा।

प्रपितामहाय गन्धादि (पदक) दानम्— ॐ अद्यामुक गोत्रस्य पितुरमुक शर्मण: शुद्ध चातुर्वार्षिक त्रिपौरुष श्राद्धेऽमुक गोत्रे प्रपितामह: अमुकशर्मा एतानि गन्धाक्षत धूपदीप यज्ञोपवीत ताम्बूल रौप्यमय कमण्डलु करपात्र स्वर्ण मयाङ्गुलीयक काष्ठपादुकौर्णासनकार्पास धौतोत्तरीयानि त्रिधा विभज्यं ते स्वधा। ततो जलेनासनानि भोजनपात्रसहितानि भोजनपात्रसहितानि वेष्टयित्वा मण्डलानिकुर्यात्।

मण्डलकरणम्— ॐ ब्रह्मा विष्णुश्चरुद्रश्च श्रीर्हुताशन एव च।

मण्डलानि प्रकुर्वन्ति तस्मात्कुर्वीतमण्डलम्॥

तत: श्राद्धदेयान्नाग्रभागमादाय सघृतं तत्सव्येनैव प्राङ्मुख: पुटकादिस्थजले आहुतिद्वर्यंजुहुयात्।

आहुतिद्वयम्— ॐ अग्नये कव्य वाहनाय स्वाहा। ॐ सोमाय पितृमते स्वाहा। तृतीयं तूष्णीमेव क्षिपेत्। ततो जलतिल सहितव्यञ्जनयुतमन्नम् अपसव्येन।

भूस्वामि पितृभ्य आहुति:— ॐ इदमन्नमेतद् भूस्वामी पितृभ्यो नम: इति दद्यात्। हुतशेषमन्नं सव्येन देवपात्र चतुष्टये परिवेष्य अपसव्येजन पित्रादि पात्रेपु च परिवेष्य पिण्डार्थं किंचिदवशेषयेत्। तत् उत्कृष्टमन्नंसिद्धम् आमं वा पुरुषाहार क्षमं परिविष्य यथा सम्भवमुपकरणं जलं धृतञ्च तत्रोपनीय सव्येन देवपात्र चतुष्टये अपसव्येन च पित्रादिपात्रेषु (नवस्वपि) मध्वन्नोपरि दद्यात्।

मधुदानम्— ॐ मधुवाता ऽऋतायते मधुक्षरन्ति सिन्धव: माध्वीर्न्न: सन्त्वोषधी: ॥1॥ ॐ मधुनक्तमुतोषसो मधुमत्पार्थिवꣳरज:। मधुद्यौरस्तु न: पिता ॥2॥ मधुमान्नो वनस्पतिर्मधुमाँ 2 अस्तु सूर्य:। माध्वीर्गावो भवन्तुन: ॥3॥ ॐ मधुमधु मध्विति जपेत्॥ तत: सव्येन उत्तानपाणिभ्यां देवपात्रं स्पृष्ट्वा।

देवपात्राभिमन्त्रणम्— ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽअमृतेऽअमृतं जुहोमि स्वाहा॥ ॐ इदं विष्णु र्विचक्रमे त्रेधा निदधे पदम्। समूढ़ मस्य पाꣳसुरे स्वाहा ॥2॥ ॐ कृष्ण हव्यमिदं रक्षमदीयम्॥ इति पठित्वा।

ॐ इदमन्नमित्यन्ने ॐ इमा आप: इति जले ॐ इदमाज्यम् इति घृते ॐ इदं हविरिति पुन: अन्ने दक्षिणोत्तानकरस्याङ्गुष्ठमावेश्य।

यवप्रक्षेपः— ॐ यवोऽसियवयास्मद् द्वेषो यवयारातीः। इतियवान् प्रक्षिप्य

संकल्प— ॐ अद्यामुक गोत्रस्यपितुर शर्मणः विश्वेदेवपूर्वक शुद्धचातुर्वार्षिक त्रिपौरुषश्राद्ध निमित्तक अमुक गोत्राणां पितृ पितामहप्रपितामहानाम-मुकामुक शर्मणां श्राद्धसम्बन्धिनो पुरुरवार्द्र संज्ञकाविश्वेदेवा एतद् वोऽद्यन्नं सोपकरणं परिविष्टं परिवेष्यमाणं चतुर्धा विभज्य नमः॥ इतियवकुश जलैरुत्सृजेत्॥ ततो ऽपसव्यंकृत्वा दक्षिणाभिमुख पातित वामजानुः पितुः पात्रं न्युव्जाभ्यां पाणिभ्यां स्पृट्वा।

पात्राभिमन्त्रणम्— ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृतेअमृतं जुहोमि स्वाहा। ॐ इदं विष्णु०। ॐ कृष्णहव्यमिदंरक्षमदीयम्। ॐ इदमन्नम् इत्यन्ने। ॐ इमा आप इति जले ॐ इदमाज्यम् इतिघृते। ॐ इदं हविरिति पुनः अन्ने॥ दक्षिण करस्य न्युब्जमङ्गुष्ठ निवेश्य अप्रदक्षिण क्रमेण।

तिल विकरणम्— ॐ अपहताऽअसुरा रक्षाꣳसि वेदिषदः॥ इति तिलान्विकीर्य मोटक तिलजलान्यादाय

पितृपक्षे संकल्प— ॐ अद्यामुकगोत्रे पितुरमुकशर्मा शुद्धचातुर्वार्षिक श्राद्धे भूरि भूरितर भूरि तम भोजनार्थम एतत्तेऽन्नं सोपकरण परिविष्टं परिवेष्यमाणं त्रिधा विभज्य स्वधा।

